दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

himsanskritvartah
e-Sanskritnewspaper

नवा प्रेरणा नवोत्साहः

■ पृष्ठ-3 ■ वर्ष-3 ■ अङ्क-256

1 09.07.2024 मंगलवासरः वि.सं. २०८० आषाढ़शुक्लचतुर्थी आषाढः 25 प्रविष्ठांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com

## सर्वोच्च न्यायालयः-नीट परीक्षा-सम्बद्धानां नैकासां याचिकानां वादश्रवणं कृतवान्




हिमसंस्कृतवार्ताः। शीर्ष-न्यायालयः नीट परीक्षा-सम्बद्धानां नैकासां याचिकानां वादश्रवणं कुर्वन्नस्ति। अत्रावसरे न्यायालयेन प्रोक्तं यत् परीक्षायाः निरस्तीकरणम् अन्तिमोपायः स्यात् किन्तु पुनः परीक्षायाः आदेशात् प्राक् प्रश्नपत्राणामुद्घाटनस्य उत्सज्ञानं नूनं कर्तव्यम् । अस्मिन् वादश्रवणे ऐषमो नीट-परीक्षायां कथितानाम् अनियमिततानां, कदाचाराणाञ्च आरोप-विषयिण्यः, पुनः परीक्षायोजनार्थं निर्देश-प्रदान-विषयिण्यश्च याचिकाः अपि समाविष्टाः आसन्। मुख्य-न्यायाधीशस्य डी.वाई. चन्द्रचूडस्य न्यायमूर्तेः जे.बी. पारदीवाला वर्यस्य, न्यायमूर्तेः मनोज मिश्रस्य च न्याय-पीठेन आहत्य अष्टत्रिंशद् याचिकानां वादश्रवणं विधीयते। पीठमिदम् सर्वादौ तासां याचिकानां श्रवणं कृतवत् यासु याचिकासु परीक्षाणां कदाचारस्य कारणेन पुनः परीक्षायाः आयोजनं याचितम् आसीत्। एतदनन्तरमेव एन.टी.ए. इति राष्ट्रिय-परीक्षाभिकरणस्य केन्द्रस्य च वादाः श्रोष्यन्ते।

## मध्यप्रदेश-मन्त्रिमण्डल विस्तारः रामनिवास रावताय राज्यपालेन

### मन्त्रित्वेन शपथ-वचनं कारितम्

हिमसंस्कृतवार्ताः। मध्यप्रदेशे सोमवासरे राज्य-मन्त्रिमण्डलस्य संक्षिप्त-विस्तारे राज्यपालेन 'मंगू भाई पटेल' वर्येण रामनिवास रावताय मन्त्रिमण्डलीय-मन्त्रित्वेन शपथ-वचनं कारितम्। सम्प्रति राज्य- मन्त्रिपरिषदि संहत्य एकत्रिंशन्मिताः मन्त्रिणः सञ्जाताः। अस्मिन् अवसरे मुख्यमन्त्री डॉ. मोहनः यादवः, अन्ये च मन्त्रिमण्डलस्य सदस्याः उपस्थिताः आसन्। श्रीरावतः येन अद्य नूतन-मन्त्रित्वेन पद-गोपनीयतायाः शपथवचनं स्वीकृतं, सः चम्बल-क्षेत्रस्य वरिष्ठो नेता वर्तते। असौ विजयपुर-आसनात् षट्कृत्वः विधायकत्वेन प्रचितः अस्ति। अत्रेदमपि धेयमस्ति यत् श्रीरावतः कतिपय-मास-पूर्वमेव कांग्रेस-दलात् त्यागपत्रं प्रदाय भाजपादले समाविष्टः नासीत्।

## प्रधानमन्त्री श्रीनरेन्द्रमोदी रूस-आस्ट्रिया-देशयोः च त्रिदिवसीय आधिकारिक- यात्रायाः प्रथमे चरणे मॉस्कोनगरं प्राप्तवान्




हिमसंस्कृतवार्ताः। मोदिनः रूसाँस्ट्रिया यात्रा प्रधानमन्त्री श्रीनरेन्द्रमोदी रूस-आस्ट्रिया-देशयोः च त्रिदिवसीय आधिकारिक-यात्रायाः प्रथमे चरणे मॉस्कोनगरं प्राप्तवान्। तत्र प्राप्तेः अनन्तरं मॉस्कोविमानपत्तने श्रीमोदिनः भव्यं राजकीयं स्वागतं जातम्। अस्मिन् अवसरे रूस-देशस्य उप-प्रधानमन्त्रिणा डेनिस मन्टूरोव इत्यमुना तत्रैव विमानपत्तने उपस्थाय श्रीमोदिनः अभ्यागमनं सत्कृतम्। रूस देशम्प्रति प्रस्थानात् पूर्व प्रधानमन्त्रिणा श्रीमोदिना एकस्मिन् सामाजिक सञ्जालीये सन्देशे लिखितं यत् यात्रेयं रूसदेशेन ऑस्ट्रियादेशेन च साकं सम्बन्धानां प्रगाढीकरणे एकः समुत्कृष्टः अवसरः भविष्यति। एताभ्यां देशाभ्यां साकं भारतस्य मित्रता समयस्य निकषे सुदृढं जातमस्ति। श्रीमोदी उक्तवान् यत् सः एतयोः देशयोः निवसद्भिः भारतीय समुदायस्य जनैः समम् अपि सम्भाषणार्थं पर्युत्सुकीभवति। रूसदेशे प्रधानमन्त्री श्रीमोदी द्वाविंशे भारत-रूस- वार्षिकशिखर सम्मेलने भागं भजिष्यति। अपरत्र च अस ऑस्ट्रियादेशस्य प्रथमयात्रायां गमिष्यति। अस्माकं वार्ताहरो वर्णयति यत् भारत-रूस-सम्बन्धानां विषये प्रधानमन्त्री प्रावोचत् यत् तेन राष्ट्रपतिः ब्लादिमिर पुतिनेन साकं द्वैपाक्षिक-सहयोगस्य सर्वे अपि पक्षाः समीक्ष्यन्ते, सहैव श्रीमोदी विभिन्न क्षेत्रीयेषु वैश्विकेषु च विषयेषु स्वीयं दृष्टिकोणमपि विनिमयीकरिष्यति।

## झारखण्डविधानसभायाम् हेमन्त-सोरेन-सर्वकारेण विश्वासमतम् अधिगतम्



हिमसंस्कृतवार्ताः। झारखण्ड-विधानसभायाम् हेमन्त-सोरेन-सर्वकारेण विश्वासमतम् अधिगतम्। झारखण्ड-मुक्तिमोर्चायाः नेतृत्व-युतस्य संयुतेः पञ्चत्वारिंशद् विधायकैः विश्वास-प्रस्तावस्य पक्षे मतदानम् आचरितम्। अतः पूर्व मुख्यमन्त्री हेमन्तः सोरेनः राज्यविधानसभायां विश्वास- प्रस्तावं प्रस्तुतवान्। यस्मिन् भूरि चर्चाः सञ्जाताः। मतविभाजनस्य अवसरे विपक्षेण भृशं कोलाहलः समाचरितः। सोरेन-सर्वकारं विरुध्य घोषोच्चारणं कृतम्। विश्वासमतस्य अनन्तरं सदनम् अनिश्चित-कालावधये स्थगितं जातम्। अष्टचत्वारिंशद्-वर्षीयः सोरेनः कथित-भूमि- प्रवञ्चनायां अवैध-धनाहरण-प्रसंगे प्रत्याभूति-प्राप्तेरनन्तरं एक-सप्ताहाभ्यन्तरे जुलाई- चतुर्थ्यां मुख्यमन्त्रित्वेन शपथ-वचनं स्वीकृतवान् आसीत्। अत्रान्तरे मुख्यमन्त्रिणा मन्त्रिमण्डलस्य विस्तारिकरणप्रसङ्गे द्वौ कांग्रेसदलीयौ नेतारौ एकश्च झारखण्ड-मुक्तिमोर्चायाः नेता मन्त्रिमण्डले समावेशिता सूच्यन्ते इति।

## राहुलगांधी राज्यस्य जलप्लावनेन प्रभावितैः जनैः सह मेलनं कृतवान्



हिमसंस्कृतवार्ताः। नेताप्रतिपक्षः राहुलगांधी स्वीयैकदिवसीय यात्रान्तर्गतं मणिपुरं सम्प्राप्तवान् असौ सोमवासले प्रातः असमस्य कछारक्षेत्रं सम्प्राप्य राज्यस्य जलप्लावनेन प्रभावितैः जनैः सह मेलनं कृतवान्। तदनु असौ मणिपुरस्य जिरीबामजनपदं प्रति अगच्छत् तत्रासौ जनपदे हिंसया प्रभावितैः परिवारैः सह वार्ता कृतवान्। इम्फालस्य यात्रानन्तरं श्रीगांधी चुराचांदपुरं प्रति गतवान्। इम्फालस्य प्रस्थानात् पूर्वं कांग्रेसनेता एषः मणिपुरस्य राज्यपालेन अनुसुइया उइके इत्यनया सहापि मेलनं करिष्यति।

## मुम्बय्याः विविधेषु भागेषु अत्यधिकवृष्ट्याः कारणेन सामान्यं जनजीवनं प्रभावितम्

हिमसंस्कृतवार्ताः। मुम्बय्याः विविधेषु भागेषु अद्य त्रिशतं मिलीमीटरमितायाः अत्यधिकवृष्ट्याः कारणेन सामान्यं जनजीवनं प्रभावितं जातम्। अतिवृष्ट्या मुम्बय्याः अपि च उपनगराणां निम्नक्षेत्रेषु जलं एकत्रितम् अभवत्। नगरस्य जीवनरेखाः उपनगरीय रेलसेवाः अपि सङ्कटग्रस्ताः सन्ति। वडाला-मानखुर्दयोः मध्ये हार्बर-पट्टिकायां रेलयानानि अस्थायिरूपेण स्थगितानि। एतदतिरिच्य बसयानसेवामार्गाः परिवर्तिताः। विद्यालयेषु महाविद्यालयेषु च प्रथमसत्राय अवकाशः अपि उद्घोषितः। मुम्बई-विश्व-विद्यालयस्य कतिपय-परीक्षाः स्थगिताः। अत्रान्तरे भारतुर्त-विज्ञान-विभागेन-मुम्बईनगर्यां महतीं वृष्टि समीक्ष्य नारङ्गसङ्केतनापि प्रख्यापिता।

## सुभाषितम्

**देवो रुष्टे गुरुस्त्राता**
**गुरो रुष्टे न कश्चनः।**
**गुरुस्त्राता गुरुस्त्राता**
**गुरुस्त्राता न संशयः।।**

भावार्थ- भाग्य रूठ जाए तो गुरु रक्षा करता है, गुरु रूठ जाए तो कोई नहीं होता। गुरु ही रक्षक है, गुरु ही रक्षक है, गुरु ही रक्षक है, इसमें कोई संदेह नहीं।

*✍ प्रतीकसाठ्ये मुम्बई*

**सूचना-** हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## कश्मीर-स्वास्थ्य-सेवा-निदेशालयेन श्रीअमरनाथयात्रायै एका विशिष्टा पोनी इति रूग्णवाहनसेवा प्रचालिता



हिमसंस्कृतवार्ताः। जम्मूकश्मीरे कश्मीर-स्वास्थ्य-सेवा-निदेशालयेन श्रीअमरनाथयात्रायै एका विशिष्टा पोनी इति रूग्णवाहनसेवा प्रचालिता। या हि तीर्थयात्रिभ्यः तेषां यात्रावधी चिकित्सकीसौविध्यानि प्रदास्यति। स्वास्थ्य-चिकित्सा शिक्षा-सचिवस्य डॉ. सैयद आबिद रशीदशाहस्य मार्गदर्शन कश्मीर-स्वास्थ्यसेवा-निदेशकस्य डॉ. मुश्ताक अहमद-राबरस्य अस्य पदक्षेपस्य यात्रिभिः प्रशंसा कृता।

## पूर्वोत्तरीय-भागेषु धारासार-वृष्टेः पूर्वानुमानम् - ऋतुविज्ञानविभागः

हिमसंस्कृतवार्ताः। अरुणाचलप्रदेश-नागालैण्ड-राज्ये समेत्य देशस्य पूर्वोत्तरीय-भागेषु धारासार-वृष्टेः पूर्वानुमानः कृतः ऋतु-विज्ञान-विभागेन। आकाशवाण्या सह सम्भाषमाणः ऋतु-विज्ञान- विभागस्य वरिष्ठः वैज्ञानिकः सोमासेनरॉयः विज्ञापितवती यत् मध्यभारतस्य अनेकानि क्षेत्राणि अत्यधिकवृष्टेः अवलोकनार्थं साक्षिणो भविष्यन्ति। अपि च, पूर्वोत्तरभारतेऽपि महतीवृष्टिः भविष्यत्येव।

# हिमाचलप्रदेशविश्वविद्यालयेन घोषितः स्नातक- अन्तिमवर्षस्य परीक्षा-परिणामः




**हिमसंस्कृतवार्ताःशिमला।** हिमाचलप्रदेशविश्वविद्यालयेन सोमवासरे बीए- अन्तिमवर्षस्य परिणामः घोषितः। अस्यां परीक्षायां कुलम् १८५६४ छात्राः उपस्थिताः येषु १५७२४ छात्राः उत्तीर्णाः अभवन्। अस्मिन् समये विश्वविद्यालयस्य उत्तीर्णता प्रतिशतं ९२.८२ प्रतिशतं जातम्। अस्मात् पूर्वं विज्ञानसंकायस्य वाणिज्यसंकायस्य च (Science and B.Com) अन्तिमवर्षस्य छात्राणां परिणामः अपि घोषितः अस्ति। अस्मिन् हमीरपुर- उपाधि- महाविद्यालयस्य धनेटायाः अञ्जलिदेवी प्रथमस्थानं प्राप्तवती। अस्यां परीक्षायां तया ९.०५ सी.पी.जी.ए. प्राप्तानि। एतेन सह बिलासपुरस्य स्वामीविवेकानन्द- डिग्रीमहाविद्यालयस्य घुमारवीं इत्यस्य रक्षितः 8.99 सीपीजीए प्राप्य द्वितीयस्थाने अस्ति। मण्डी महाविद्यालयस्य कविता ८.९६ सी.पी.जी.ए. प्राप्य तृतीये स्थाने अस्ति। एतदतिरिक्तं एमएलएसएम- महाविद्यालयस्य सुन्दरनगरस्य मनीषाकुमारी ८.८९, बिलासपुर- महाविद्यालयस्य अंकितः ८.८५, संजौलीमहाविद्यालयस्य नरेशः ८.८३, मेहरचन्दमहाविद्यालयस्य कांगड़ायाः कृतिका ८.८३, मण्डी महाविद्यालयस्य पल्लवी ८.८१, मण्ड्याः तिलकराजः अनिलश्च ८.८३ सीपीजीए प्राप्तवन्तः। अनेन सह मण्डी महाविद्यालयस्य अश्वनी ८.७७ सीपीजीए प्राप्त्वा सम्पूर्णे राज्ये १० स्थानं प्राप्तवान्। हिमाचलविश्वविद्यालयस्य परीक्षानियन्त्रकः प्रो श्यामलाल कौशनः अवदत् यत् एषः परिणामः अन्तर्जालपुटे स्थापितः अस्ति। अनेन सह अधुना सर्वेषाम् अन्तिमवर्षसंकायानां परिणामाः घोषिताः सन्ति।

# ४०० पारं उद्घोषकर्तृ भाजपायै जनैः वास्तविकं मुखं दर्शितम्, जनता केएलठाकुराय पुनः अवसरं न दास्यति



**हिमसंस्कृतवार्ताः - नालागढ़म्।** काङ्ग्रेसस्य राष्ट्रियमहासचिवः सचिनपायलटः अवदत् यत् जनसमूहेन तस्मै दलाय वास्तविकं मुखं दर्शितम् यत् ४०० पारं कर्तुं उद्घोषं करोति स्म। अग्रिमः समयः काङ्ग्रेसपक्षस्य कृते अस्ति। अधुना ध्रुवीकरणस्य राजनीतिं कुर्वतां जनसमूहः स्वीकृतवान् अस्ति। सः विश्वासं अकरोत् यत् हिमाचले विधानसभासनत्रयेषु उपनिर्वाचने काङ्ग्रेस-अभ्यर्थिनः विजयं प्राप्नुवन्ति। नालागढस्य पंजेहरायां निर्वाचनसभां सम्बोधयन् सः अवदत् यत् अस्मिन् समये लोकसभायां अभिमानेन, एकाधिकवृत्त्या स्वसर्वकारस्य सत्तायाः दुरुपयोगं कृत्वा भाजपायाः कृते जनसमूहेन समुचितं उत्तरं दत्तम्। हिन्दु-मुस्लिमविषये जनान् भ्रमितं यद् दलम् अस्ति तस्य दलस्य अस्मिन् समये पूर्णबहुमतं न प्राप्तम्। विखण्डित लोकसभा निर्मिता अस्ति। अग्रिमः समयः काङ्ग्रेसस्य एव इति जनसामान्यं भाजपाय दर्शितवती अस्ति।

सः अवदत् यत् नालागढस्य जनाः के.एल.ठाकुरं विधायकरूपेण प्रेषितवन्तः परन्तु सः जनस्य कार्यं सम्पादयितुं असफलः अभवत्, जनसमूहः तस्मै पुनः पुनः अवसरं न दास्यति। अस्मिन्नवसरे उपमुख्यमंत्री मुकेशः अग्निहोत्री, प्रदेशाध्यक्षा प्रतिभासिंह, स्वास्थ्यमंत्री धनीरामशांडिलः, पूर्वमंत्री रामलालठाकुरः, उद्योगमंत्री हर्षवर्धनचौहानः, गंगुराममुसाफिरः, ठाकुरकौलसिंहः, जिलाध्यक्षः शिवकुमारः, आदयः अपि सम्बोधितवन्तः तथा च काङ्ग्रेसं प्रति जनसमुदायस्य समर्थनं याचितवन्तः।

# 'होशियारसिंहः भूमिपुत्रः देहरामुखम्, तृतीयवारं अपि आशीर्वादं प्राप्स्यति'- जयरामठाकुरः



**हिमसंस्कृतवार्ताः - देहरा।** विपक्षनेता जयरामठाकुरः सोमवासरे देहरानगरे अवदत् यत् धरतीपुत्रहोशियारसिंहः देहरायाः मुखम् अस्ति, तृतीयवारं अपि सः जनानां आशीर्वादं प्राप्स्यति। स्वमित्रपरिवारस्य लाभाय संलग्नं मुख्यमन्त्रिणं राज्यस्य जनाः नाङ्गीकृतवन्तः। जयरामः मुख्यमन्त्रिणं भ्रष्टाचारस्य आरोपं कृत्वा तस्कराणां संरक्षणं कृत्वा भयंकररूपेण कोणं कृतवान्। भ्रष्टाचारविषये मुख्यमन्त्री किमर्थं मौनम् अस्ति इति पूर्वमुख्यमन्त्री पृष्टवान्। तेषां मौनस्य कारणं किम् ? राज्ये प्रतिदिनं घोटालाः प्रकाशं प्राप्नुवन्ति, परन्तु मुख्यमन्त्री मौनं धारयति। राज्यस्य जनाः ज्ञातुम् इच्छन्ति यत् तेषां समीपे एते घोटालाः कथं भवन्ति। भ्रष्टाः, अपराधिनः, तस्कराः च कस्य रक्षणं प्राप्नुवन्ति ? तेषां विरुद्धं पुलिस किमर्थं प्रभावी कार्यविधिं न करोति ? उपनिर्वाचनेषु जनसमूहः भाजपा-प्रत्याशिनां त्रयोऽपि विशालमतैः विजयी करिष्यति। द्विवारं देहरा-क्षेत्रस्य मतदातारः कस्यचित् दलस्य समर्थनं विना होशियारसिंहं विधानसभां प्रति प्रेषितवन्तः। अतः मुख्यमन्त्री देहरा-क्षेत्रस्य जनान् भयभीतान् कर्तुं त्रुटिं न कुर्यात् । एतेषु त्रिषु आसनेषु विजयः विधानसभायां भाजपायाः संख्यात्मकं बलं वर्धयिष्यति। जयरामठाकुरः अवदत् यत् सम्पूर्णं राज्यं जानाति यत् हमीरपुर-काङ्गरा-जनपदयोः बृहत्तमाः खननतस्कराः के सन्ति, तेषां मुख्यमन्त्रिणा सह के सम्बन्धाः सन्ति इति। भाजपा मुख्यमन्त्रीतः ज्ञातुम् इच्छति यत् किं जातम् यत् २०२२ तमस्य वर्षस्य डिसेम्बरमासे सर्वकारस्य निर्माणस्य मासद्वयस्य अन्तः २०२३ तमस्य वर्षस्य फेब्रुवरीमासे खनननीतिः परिवर्तिता? नादौने यदा राज्ये आपदा अभवत् तदा कस्य पाषाणमर्दकः धावति स्म ? अस्मिन्नवसरे विधायकः विपिनसिंहपरमारः, पवनकाजलः, राकेशजमवालः अन्ये कार्यकर्तारः च उपस्थिताः अभवन्

# फलविपण्यां सेबस्य आगमनं वर्धयितुम् आरब्धम्, सार्वभौमिक-पेटिकायां शिमलानगरं सेबफलानाम् एकसहस्रपेटिकाः प्राप्ताः

**हिमसंस्कृतवार्ताः - शिमला ।** हिमाचलप्रदेशस्य शिमलाफलविपण्यां सेबस्य आगमनेन तस्य आगमनमपि वर्धमानं प्रारब्धम् अस्ति। सोमवासरे भट्टाकुफरफलविपण्यां टाइडमैन सेबं किलोग्रामेण विक्रीतम्। सार्वभौमिकायां पेटिकायां विक्रयणार्थं प्रायः एकसहस्रपेटिकाः आगताः, आगामिसमये तस्य संख्या वर्धते। करसोगक्षेत्रात् फलविपणीं यावत् टाइडमैन् सेबं प्राप्य प्रतिपेटिका ७०० तः १५०० यावत् विक्रीयते स्म। भट्टाकफ्फरफलविपण्याः विनिमय-अभिकर्ता जयकुमारः अवदत् यत् अधुना फलविपण्यां सेबस्य आगमनं वर्धमानं वर्तते। सः अवदत् यत् सेबस्य लघुपरिमाणात् मूल्यानि अपि न्यूनानि सन्ति। सेबेषु अनावृष्टेः प्रभावः दृश्यते। अस्मिन् समये आकारः लघुः अस्ति तथा च आगामिषु दिनेषु अपि सेबस्य अधिकं मूल्यं प्राप्तुं न्यूना सम्भावना वर्तते।

सः अवदत् यत् सम्प्रति भण्डारणसेबं विपण्यां विक्रीयते। जनाः केवलं न्यूनमूल्येन सेबं क्रीणन्ति, अतः आगामिषु दिनेषु मूल्येषु अधिकवृद्धेः सम्भावना न्यूना अस्ति। यदि सेबस्य आकारः विकसितः तर्हि मूल्यं श्रेष्ठं भवितुम् अर्हति।



सोमवासरे करसोगस्य टाइडमैनसेबं फलविपण्यां प्राप्तवान्, अधिकांशं सेबफलं सार्वभौमिक- पेटिकारूपेण आगच्छति। अद्य विपण्यां प्राप्तं टाइडमैन प्रतिकिलो ५०तः ७० रुप्यकाणि यावत् विक्रीयते। यत्र नाशपाती अपि प्रतिकिलो ७० तः ८० रुप्यकेषु विक्रीयते स्म। तस्मिन् एव काले देहाबल्सनतः नाशपातीविक्रयणार्थम् आगतः शशिकान्तः अवदत् यत् अस्मिन् समये सस्यं न्यूनं भवति, नाशपातीमूल्यानि सामान्यानि सन्ति।

सर्वकारस्य सार्वभौमिक-पेटिकायाः निर्णयस्य स्वागतं कुर्वन् सः अवदत् यत् एषः अद्यापि प्रारम्भिकं चरणम् अस्ति, उद्यानपालकैः एतत् अवगन्तुं भविष्यति। सः अवदत् यत् पूर्वं यत्र ३५ किलोग्रामपर्यन्तं सेबं पेटिकामध्ये समायोजितम् आसीत्, अधुना तत् न भविष्यति, सर्वेषां मूल्यं समानं भविष्यति। व्ययस्य विषये वदन् सः अवदत् यत् पूर्वं एकस्य पेटिकायाः मूल्यं प्रायः ३०० रूप्यकाणि भवति स्म तथा च वाहनस्य परिवहनम् अपि पेटिकानुसारं भवति स्म, परन्तु अधुना यदि पेटिकानुसारं वाहने सेबस्य परिवहनं भवति तर्हि महत् मूल्यं भविष्यति परन्तु भारस्य अनुसारं महत् स्यात् उद्यानपालकाः अतिभारं न प्राप्स्यन्ति।

# व्यापारे शीर्षस्थाने भारतम्

संकलितम् अनुदितं च
सुधा साठ्ये मुंबई

कार्तिक पूर्णिमा अर्थात् त्रिपुरी पूर्णिमा। तुलसी विवाह दिवसः। चतुर्मासस्य अन्तिमदिवसः। दिवाली अधुना एव व्यतीता अस्ति। वातावरणे सर्वत्र सुखं वर्तते। शिशिरस्य सुखदः आरम्भः। एतादृशे सजीववातावरणे ओडिशा-देशस्य कटकनगरे महानादीतटे स्थितः गड्गडियाघाट जनानां पूरितः अस्ति। सर्वेषां मुखं सुखेन प्लावितम् अस्ति। प्राचीनकालस्य महानामानां (नौकानां) प्रतिकृतयः नदीतीरे स्थापिताः सन्ति। भक्ताः एतानि नामानि भावेन पूजयन्ति। सम्पूर्णे ओडिशादेशे बालीयात्रायाः उत्सवः भवति।

बालि यात्रा- अक्षरशः बाली-नगरस्य यात्रा। न्यूनातिन्यूनं सार्धद्विसहस्रवर्षपूर्वं तत्कालीनस्य कलिंगसाम्राज्यस्य व्यापारिणः जावा, सुमात्रा, बोर्निओ, श्रीलङ्का इत्यादिभिः सह अद्यतनस्य इन्डोनेशियादेशस्य बालीनगरं गच्छन्ति स्म। प्रतिवर्षं एतादृशेन उत्सवेन व्यापारः आरब्धः।

समुद्रव्यापारस्य एतां स्मृतिः अद्यत्वे अपि ओडिशादेशस्य जनाः संरक्षितवन्तः। अस्मिन् अवसरे समग्रः ओडिशादेशः कलिङ्गसाम्राज्यस्य महाबलपितृन्, साहसिकव्यापारेण समृद्धान् वणिजान्, नौकायान-उत्कृष्टान् कलिङ्ग-नाविकान् च गर्वेण स्मरति नमस्कारं करोति 'बोइता' इत्यस्य अर्थः ओडियाभाषायां बृहत् नाम। सः अद्य पूज्यते। अतः अयं दिवसः 'बोइता वन्दनम्' इति अपि उच्यते।

एतानि 'बोइताः' तस्मिन् काले कलिङ्गसाम्राज्ये निर्मिताः आसन्। एतेषां पोतानां कङ्कालस्य ताम्रस्य बहुपरिमाणं प्रयुक्तम् आसीत्। (अद्यत्वेऽपि ओडिशादेशस्य मयूरभञ्ज- सम्बलपुर-मण्डलेषु बृहत्-ताम्रखानानि सन्ति)। एतेषु यानेषु एकस्मिन् समये सप्तशताः जनाः/ पशवः यात्रां कर्तुं शक्नुवन्ति स्म। तस्मिन् समये बङ्गालस्य खाड़ी 'कलिङ्गसागर' इति नाम्ना प्रसिद्धा आसीत् यतः समुद्रः कलिङ्गराज्ये निर्मितैः जहाजैः पूर्णः आसीत्। तस्मिन् काले समुद्रव्यापारे कलिङ्गस्य प्रभावः कः भवेत्?

अतः महाकवि कालिदास 'रघुवंश' नामके महाकाव्ये कलिंगराजं 'समुद्रदेव' इति कथयति! तस्मिन् काले ताम्रलिप्ति (वर्तमानस्य तामलुक), मणिकापत्तनम्, चेलितालो, पिठण्ड, गोपालपुरम्, कलिंगपट्टनम्, बालेश्वरः (बालासोर) महत्त्वपूर्णाः उन्नताः च बन्दरगाहाः आसन्। एतेषां बन्दरगाहानां माध्यमेन एव बृहत् व्यापारिकनौकाः दक्षिणपूर्व एशियायाः अधिकांशदेशैः सह व्यापारं कुर्वन्ति स्म।



'बालीयात्रा' उत्सवः प्राचीनभारतीयव्यापारस्य उत्खनितप्रमाणम् अस्ति। प्रायः १५००तः २००० वर्षाणि पूर्वं दक्षिणपूर्व एशियायां भारतीयव्यापारिणः बहुधा व्यापारं कुर्वन्ति स्म। जावा, सुमात्रा, यत् अद्यतनं थाईलैण्ड अस्ति, तत् तेषु दिनेषु 'सुवर्णद्वीपः' इति उच्यते स्म। तत्र सुवर्णसदृशः प्रदेशः, गौरवसम्पन्नः हिन्दूनां साम्राज्यम् आसीत्। अतः जावा-सुमात्रा अथवा बाली, बोर्निओ इत्यनेन सह व्यापारः स्वाभाविकः आसीत्। परन्तु भारतस्य बृहत्तमः व्यापारः चीनदेशेन सह आसीत्। अद्यतनस्य चीनदेशः तस्मिन् समये भिन्नराज्येषु विभक्तः आसीत्। सः भारतस्य चीनदेशात् मसालाः, आयुर्वेदिकौषधानि, ओषधयः, सूतीवस्त्राणि, बहुमूल्यानि पाषाणानि, रत्नानि, माणिक्याणि, हीराणि, आभूषणम् इत्यादीनि आयातयति स्म। अतः आर्थिकदृष्ट्या भारतस्य चीनदेशाय निर्यातः अतीव अधिकः अस्ति। वयं चीनदेशात् केचन वस्तूनि आयातन्तः आसन्। तस्मिन् वेणुदण्डाः, किञ्चित् क्षौमम् इत्यादयः आसन्। तेषां मूल्यं न्यूनम् आसीत्। अतः तस्मिन् काले चीनदेशेन सह भारतस्य व्यापारः सर्वदा 'अधिशेषः' एव आसीत्। चीनदेशस्य दक्षिणभागे स्थितैः युन्नान-सिचुआन्-राज्यैः सह भारतस्य नियमितव्यापारः आसीत्। चीनदेशेन सह व्यापारस्य प्रथमः उल्लेखः कौटिल्यस्य (चाणक्यस्य) 'अर्थशास्त्रम्' इति पुस्तके अस्ति। अर्थात् ख्रीष्टात् पूर्वं प्रायः सार्धत्रिशतवर्षाणि यावत्। चीनस्य इतिहासे भारतेन सह व्यापारस्य प्रथमः अभिलेखः झाङ्ग कियान् (१९५ ईपूतः ११४ ईपू यावत्) इत्यस्य लेखनात् प्राप्तः। झाङ्ग किआङ्ग मूलतः सैन्यव्यवसायस्य अधिकारी अस्ति। चीनदेशस्य हानवंशस्य तत्कालीनेन राजा वु इत्यनेन सः राजदूतः नियुक्तः, अन्यैः देशैः सह व्यापारसम्बन्धं स्थापयितुं च आह। भारतस्य कृते 'शेन्दु' इति शब्दस्य प्रयोगः अस्ति। अयं शब्दः 'सिन्धु' शब्दस्य भ्रष्टः अस्ति। भारतं हीरकं, माणिक्यं, रत्नम्, मसालाः, वस्त्राणि इत्यादीनि बहुमूल्यानि वस्तूनि चीनदेशाय निर्यातयति इति सः उल्लेखितवान्। परन्तु सः वेणुयष्टिकाः इत्यादीनि वस्तूनि आयातयति।' अद्यापि चीनदेशेन सह प्राचीनभारतीयव्यापारस्य केचन प्रमाणानि सन्ति। चीनदेशस्य फूजियानप्रान्तस्य क्वान्झौनगरे अनेकानि हिन्दुमन्दिराणि दृश्यन्ते। यद्यपि अस्मिन् नगरे कैयुआनमन्दिरं बौद्ध-मन्दिरम् इति प्रसिद्धम् अस्ति तथापि हिन्दु-बौद्ध-उभय-पूजायाः कृते निर्मितं मन्दिरम् अस्ति। यूनेस्को इत्यनेन २०२१ तमे वर्षे 'विश्वधरोहरस्थलम्' इति घोषितम्।

अस्य मन्दिरस्य निर्माणं ६८५-६८६ तमे वर्षे अभवत्। तस्मिन् समये चीनदेशे टेङ्ग-वंशस्य शासनम् आसीत्। अस्मिन् मन्दिरे बृहत्तमस्य सभागारस्य नाम 'महावीरभवनम्' अस्ति। अस्य महावीरभवनस्य पृष्ठतः एकं लघुमन्दिरम् अस्ति, यत्र हिन्दूदेवतानां विग्रहाः (मूर्तयः) सन्ति। अस्मिन् भगवतः विष्णुमूर्तिः बृहती अस्ति। कैयुआन् मन्दिरसमूहस्य एतत् मन्दिरं मूलमन्दिरस्य षट्शतवर्षेभ्यः अनन्तरं अर्थात् १२८३ ई. तमे वर्षे निर्मितम्। (अन्यः अर्थः अस्ति यत् अस्मिन् काले भारतस्य चीनदेशेन सह व्यापारः अबाधितः एव अभवत्)। ऐन्नुरु-नगरस्य तमिल-व्यापारि-समुदायेन वलन्जियार इत्यनेन अस्य मन्दिरस्य निर्माणं कृतम्। तथैव अस्य मन्दिरस्य भित्तिषु संस्कृत-तमिलभाषायां शिलालेखाः उत्कीर्णाः सन्ति। अयं समुदायः व्यापारार्थं चीनदेशस्य क्वान्झौनगरे निवसति स्म।

## ऋणमोचनमंगलस्त्रोत्रम्




मंगलो भूमिपुत्रश्च ऋणहर्ता धनप्रदः ।
स्थिरासनो महाकाय सर्वकर्मावरोधकः ॥ 1||
लोहितो लोहिताक्षश्च सामगानां कृपाकरः ।
धरात्मजः कुजौ भौमो भूतिदो भूमिनन्दनः ॥2॥
अंङ्गारको यमश्चैव सर्वरोगापहारकः ।
वृष्टः कर्ताऽपहर्ता च सर्वकामफलप्रदः ॥3॥
एतानि कुजनामानि नित्यं यः श्रद्धया पठेत् ।
ऋणं न जायते तस्य धनं शीघ्रमवाप्नुयात् ।।4।।
धरणीगर्भसंभूतं विद्युतकान्तिसमप्रभम् ।
कुमारं शक्तिहस्तं च मंगलं प्रणमाम्यहम् ।।5।।
स्तोत्रमङ्गारकस्यैतत्पठनीयं सदा नृभिः ।
न तेषां भौमजा पीड़ा स्वल्पाऽपि भवति क्वचित्
॥6।।
अंङ्गारको ! महाभाग भगवन्भक्तवत्सल ।
त्वां नमामि ममाशेषमृणमाशु विनाशयः।॥7॥
ऋणरोगादिदारिद्रयं ये चान्ये ह्यपमृत्यवः ।
भयक्लेश मनस्तापा नश्यन्तु मम सर्वदा ॥8।।
अतिवक्र ! दुराराध्य ! भोगमुक्तोजितात्मनः ।
तुष्टो ददासि साम्राज्यं रूष्टो हरसि तत्क्षणात् ॥9॥
विरञ्चि शक्र विष्णूनां मनुष्याणां तु का कथा।
तेन त्वां सर्वसत्वेन ग्रहराजो महाबलः ।। 10।।
पुत्रान्देहि धनं देहि त्वामरिम शरणं गतः ।
ऋणदारिद्रयं दुःखेन शत्रूणां च भयात्ततः ।।11।।
एभिर्द्वादशभिः श्लोकैर्यः स्तौति च धरासुतम् ।
महतीं श्रियमाप्नोति ह्यपरो धनदो युवा ॥12॥

(हिमाचलसर्वकारः)
हिमाचल-संस्कृत-अकादमी
उच्चतरशिक्षानिदेशालयपरिसरः, शिमला हिमाचलप्रदेशः
दिनांकः- 11 जुलाई से 15 जुलाई 2024
विद्या ह वै ब्राह्मणमाजगाम
गोपाय मा शेवधिष्टेऽहमस्मि ।।
"पौरोहित्य एवं कर्मकाण्ड प्रशिक्षण शिविर"
वर्गाधिकारी- महन्त उपेन्द्र पाराशर जी
डॉ.रामकुमारकौल
डॉ.खेमराजशर्मा
स्थानम्- श्री श्री नकोदर दास गद्दी धर्मशाल महन्ता जिला ऊना हि.प्र.
कार्यक्रमसंयोजक- डॉ.अमनदीपशर्मा सम्पर्क 9418927271
स्वागतकर्ता- डॉ.केशवानन्दकौशलः सचिवः हिमाचल-संस्कृत-अकादमी